हर हर शङ्कर ॐ जय जय शङ्कर








श्री-वेदव्यासाय नमः

# श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
# श्री-काञ्ची-कामकोटि-पीठम्
# जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्रीनृसिंह-जयन्ती-लघु-पूजा-पद्धतिः ॥

वैशाख-शुक्ल-चतुर्दशी / ५१२८-मेषः-१७ / ३०.४.२०२६

(आचम्य)

[विघ्नेश्वरपूजां कृत्वा।]

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

प्राणान् आयम्य। (अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे** **वसन्त**-ऋतौ **मेष-वैशाख**-मासे **शुक्ल**-पक्षे **चतुर्दश्यां** शुभतिथौ **गुरु**वासरयुक्तायां **चित्रा**-नक्षत्र-युक्तायां **वज्र**-योगयुक्तायां **गरजा**-करण (०८:३०; **वणिजा**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **चतुर्दश्यां** शुभतिथौ
भगवतो नरसिंहस्य प्रसादेन ---

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

- अखण्ड-भारते अन्यत्र च सनातन-धर्म-अवलम्बिनां सुरक्षा-सिद्ध्ये
- जनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्कार्येभ्यः निवृत्त्यर्थं
- साधूनां धार्मिकाणां च धैर्य-विश्वास-पुष्टि-सिद्ध्यर्थम्, आधर्मिक-शक्तीनां विनाशार्थं,
- भारतीयानां सन्ततेः सनातन-सम्प्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुम्बानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्री नृसिंह-जयन्ती-पुण्यकाले यथाशक्ति-ध्यान-आवाहनादि-षोडशोपचारैः श्री-नृसिंह-पूजां करिष्ये। तदङ्गं कलशपूजां च करिष्ये। [कलशपूजां कृत्वा।]

# प्रधान-पूजा

ध्यायामि देवदेवं तं शङ्खचक्रगदाधरम्।
नृसिंहं भीषणं भद्रं लक्ष्मीयुक्तं विभूषितम्॥

श्री-लक्ष्मी-नृसिंहं ध्यायामि।

आगच्छ देव देवेश जगद्योने रमापते।
बिम्बेऽस्मिंस्त्वदधिष्ठाने सन्निधेहि कृपां कुरु॥

श्री-लक्ष्मी-नृसिंहम् आवाहयामि।

श्री-लक्ष्मी-नृसिंहाय नमः, आसनं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, पाद्यं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, अर्घ्यं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, आचमनीयं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, मधुपर्कं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, स्नपयामि। स्नानानन्तरम् आचमनीयं समर्पयामि।

श्री-लक्ष्मी-नृसिंहाय नमः, वस्त्रं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, यज्ञोपवीतं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, दिव्यपरिमलगन्धान् धारयामि।
गन्धस्योपरि हरिद्राकुङ्कुमं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

# ॥ श्री-लक्ष्मी-नृसिंहाष्टोत्तरशतनामावलिः ॥

श्रीनृसिंहाय नमः
महासिंहाय नमः
दिव्यसिंहाय नमः
महाबलाय नमः
उग्रसिंहाय नमः
महादेवाय नमः
उपेन्द्राय नमः
अग्निलोचनाय नमः
रौद्राय नमः
शौरये नमः १०
महावीराय नमः
सुविक्रमपराक्रमाय नमः
हरिकोलाहलाय नमः
चक्रिणे नमः
विजयाय नमः
अजयाय नमः
अव्ययाय नमः
दैत्यान्तकाय नमः
परब्रह्मणे नमः
अघोराय नमः २०
घोरविक्रमाय नमः
ज्वालामुखाय नमः
ज्वालामालिने नमः
महाज्वालाय नमः
महाप्रभवे नमः
निटिलाक्षाय नमः
सहस्राक्षाय नमः
दुर्निरीक्ष्याय नमः
प्रतापनाय नमः
महादंष्ट्राय नमः ३०
प्राज्ञाय नमः
हिरण्यक-निषूदनाय नमः
चण्डकोपिने नमः
सुरारिघ्नाय नमः
सदार्तिघ्नाय नमः
सदाशिवाय नमः
गुणभद्राय नमः
महाभद्राय नमः
बलभद्राय नमः
सुभद्रकाय नमः ४०
करालाय नमः
विकरालाय नमः

गतायुषे नमः
सर्वकर्तृकाय नमः
भैरवाडम्बराय नमः
दिव्याय नमः
अगम्याय नमः
सर्वशत्रुजिते नमः
अमोघास्त्राय नमः
शस्त्रधराय नमः ५०
सव्यजूटाय नमः
सुरेश्वराय नमः
सहस्रबाहवे नमः
वज्रनखाय नमः
सर्वसिद्धये नमः
जनार्दनाय नमः
अनन्ताय नमः
भगवते नमः
स्थूलाय नमः
अगम्याय नमः ६०
परावराय नमः
सर्वमन्त्रैकरूपाय नमः
सर्वयन्त्रविदारणाय नमः
अव्ययाय नमः
परमानन्दाय नमः
कालजिते नमः
खगवाहनाय नमः
भक्तातिवत्सलाय नमः
अव्यक्ताय नमः
सुव्यक्ताय नमः ७०
सुलभाय नमः
शुचये नमः
लोकैकनायकाय नमः
सर्वाय नमः
शरणागतवत्सलाय नमः
धीराय नमः
धराय नमः
सर्वज्ञाय नमः
भीमाय नमः
भीमपराक्रमाय नमः ८०
देवप्रियाय नमः
नुताय नमः
पूज्याय नमः
भवहृते नमः
परमेश्वराय नमः
श्रीवत्सवक्षसे नमः
श्रीवासाय नमः
विभवे नमः
सङ्कर्षणाय नमः
प्रभवे नमः ९०
त्रिविक्रमाय नमः
त्रिलोकात्मने नमः
कालाय नमः
सर्वेश्वराय नमः
विश्वम्भराय नमः
स्थिराभाय नमः
अच्युताय नमः
पुरुषोत्तमाय नमः
अधोक्षजाय नमः
अक्षयाय नमः १००
सेव्याय नमः
वनमालिने नमः

प्रकम्पनाय नमः
गुरवे नमः
लोकगुरवे नमः
स्रष्ट्रे नमः
परस्मै ज्योतिषे नमः
परायणाय नमः १०८

श्री-लक्ष्मी-नृसिंहाय नमः, नानाविध-परिमल-पत्र-पुष्पाणि समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, धूपमाघ्रापयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, दीपं दर्शयामि।
नैवेद्यम्। श्री-लक्ष्मी-नृसिंहाय नमः, अमृतं महानैवेद्यं पानकं च निवेदयामि।
निवेदनानन्तरम् आचमनीयं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, कर्पूरताम्बूलं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, मङ्गल-नीराजनं दर्शयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, प्रदक्षिणनमस्कारान् समर्पयामि।

# नृसिंहावतारघट्टः

सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम्॥
—श्रीमद्भागवतम् ७-८-१८

प्रार्थनाः समर्पयामि।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

अनेन पूजनेन श्री-लक्ष्मी-नृसिंहः प्रीयताम्।

ॐ तत्सद्ब्रह्मार्पणमस्तु।

❀❀❀

# ॥ लक्ष्मी-नृसिंह-करुणारस-स्तोत्रम् ॥



https://youtu.be/ztgociIqUQI

श्रीमत्-पयो·निधि-निकेतन चक्र-पाणे
भोगी·न्द्र-भोग-मणि-राजित-पुण्य-मूर्ते।
योगी·श शाश्वत शरण्य भवा·ब्धि-पोत
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १ ॥

ब्रह्मे·न्द्र-रुद्र-मरु·दर्क-किरीट-कोटि-
सङ्घट्टिता·ङ्घ्रि-कमला·मल-कान्ति-कान्त।
लक्ष्मी-लसत्-कुच-सरोरुह-राजहंस
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ २ ॥

संसार-दाव-दहना·कर-भी-करो·रु-
ज्वालावलीभि·रतिदग्ध-तनूरुहस्य ।
त्वत्-पाद-पद्म-सरसी शरणा·गतस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ३ ॥

संसार-जाल-पतितस्य जग·न्निवास
सर्वे·न्द्रिया·र्थ-बडिशा·ग्र-झषो·पमस्य।
प्रोत्कम्पित-प्रचुर-तालुक-मस्तकस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ४ ॥

संसार-कूप·मतिघोर·मगाध-मूलं
सम्प्राप्य दुःख-शत-सर्प-समाकुलस्य।
दीनस्य देव कृपया पद·मागतस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ५ ॥

संसार-भी-कर-करी·न्द्र-करा·भिघात-
निष्पीड्यमान-वपुषः सकला·र्ति-नाश।
प्राण-प्रयाण-भव-भीति-समाकुलस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ६ ॥

संसार-सर्प-विष-दिग्ध-महो·ग्र-तीव्र-
दंष्ट्रा·ग्र-कोटि-परिदष्ट-विनष्ट-मूर्तेः ।
नागा·रि-वाहन सुधा·ब्धि-निवास शौरे
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ७ ॥

संसार-वृक्ष·मघ-बीज·मनन्त-कर्म-
शाखा-युतं करण-पत्र·मनङ्ग-पुष्पम्।
आरुह्य दुःख-फलितं पततो दयालो
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ८ ॥

संसार-सागर-विशाल-कराल-काल-
नक्र-ग्रह-ग्रसित-निग्रह-विग्रहस्य ।
व्यग्रस्य राग-निचयो·र्मि-निपीडितस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ९ ॥

संसार-सागर-निमज्जन-मुह्यमानं
दीनं विलोकय विभो करुणा-निधे माम्।
प्रह्लाद-खेद-परिहार-परा·वतार
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १० ॥

संसार-घोर-गहने चरतो मुरारे
मारोग्र-भीकर-मृग-प्रचुरार्दितस्य ।
आर्तस्य मत्सर-निदाघ-सुदुःखितस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ ११ ॥

बद्ध्वा गले यम-भटा बहु तर्जयन्तः
कर्षन्ति यत्र भव-पाश-शतै·र्युतं माम्।
एकाकिनं पर-वशं चकितं दयालो
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १२ ॥

लक्ष्मी-पते कमल-नाभ सुरे·श विष्णो
यज्ञे·श यज्ञ मधुसूदन विश्व-रूप।
ब्रह्मण्य केशव जनार्दन वासुदेव
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १३॥

एकेन चक्र·मपरेण करेण शङ्खम्
अन्येन सिन्धु-तनया·मवलम्ब्य तिष्ठन्।
वामे·तरेण वरदा·भय-पद्म-चिह्नं
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १४॥

अन्धस्य मे हृत-विवेक-महाधनस्य
चोरै·र्महा-बलिभि·रिन्द्रिय-नामधेयैः ।
मोहा·न्धकार-कुहरे विनिपातितस्य
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १५॥

प्रह्लाद-नारद-पराशर-पुण्डरीक-
व्यासा·दि-भागवत-पुङ्गव-हृ·न्निवास ।
भक्ता·नुरक्त-परिपालन-पारिजात
लक्ष्मी-नृसिंह मम देहि करा·वलम्बम्॥ १६॥

लक्ष्मी-नृसिंह-चरणा·ब्ज-मधु-व्रतेन
स्तोत्रं कृतं शुभ-करं भुवि शङ्करेण।
ये तत् पठन्ति मनुजा हरि-भक्ति-युक्ता:
ते यान्ति तत्-पद-सरोज·मखण्ड-रूपम्॥ १७॥

॥ इति श्रीमद्-गोविन्दभगवत्पाद-शिष्य-श्रीमत्-शङ्कर-भगवत्पाद-विरचितं
श्री-लक्ष्मी-नृसिंह-करुणारस-स्तोत्रं सम्पूर्णम्॥

❁

# ॥ श्री-लक्ष्मी-नृसिंह-पञ्चरत्न-स्तोत्रम् ॥



https://youtu.be/Y3vZM3b5SVM

त्वत्-प्रभु-जीव-प्रिय·मिच्छसि चे·न्नर-हरि-पूजां कुरु सततं
प्रतिबिम्बा·लङ्कृति-धृति-कुशलो बिम्बा·लङ्कृति·मातनुते।
चेतो·भृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहा·नघ-पद-सरसिज-मकरन्दम् ॥ १ ॥

शुक्तौ रजत-प्रतिभा जाता कटका·द्यर्थ-समर्था चेद्
दुःखमयी ते संसृति·रेषा निर्वृति-दाने निपुणा स्यात्।
चेतो·भृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहा·नघ-पद-सरसिज-मकरन्दम् ॥ २ ॥

आकृति-साम्या·च्छाल्मलि-कुसुमे स्थल-नलिनत्व-भ्रम·मकरोः
गन्ध-रसा·विह कि·मु विद्यते विफलं भ्राम्यसि भृश-विरसेऽस्मिन्।
चेतो·भृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहा·नघ-पद-सरसिज-मकरन्दम् ॥ ३ ॥

स्रक्-चन्दन-वनिता·दीन् विषयान् सुख-दान् मत्वा तत्र विहरसे
गन्ध-फली-सदृशा ननु तेऽमी भोगा·नन्तर-दुःख-कृतः स्युः।
चेतो·भृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहा·नघ-पद-सरसिज-मकरन्दम् ॥ ४ ॥

तव हित·मेकं वचनं वक्ष्ये शृणु सुख-कामो यदि सततं
स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्-व·दिति।
चेतो·भृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहा·नघ-पद-सरसिज-मकरन्दम् ॥ ५ ॥

॥ इति श्रीमद्-गोविन्दभगवत्पाद-शिष्य-श्रीमत्-शङ्कर-भगवत्पाद-विरचितं
श्री-लक्ष्मी-नृसिंह-पञ्चरत्न-स्तोत्रं सम्पूर्णम् ॥